International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 220-224
© 2017 IJSR
www.anantaajournal.com
Received: 11-03-2017
Accepted: 12-04-2017

**डॉ. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागे,
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः),
श्रीसदाशिवपरिसरः, पुरी, ओडिशा।

**Correspondence**
**डॉ. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागे,
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः),
श्रीसदाशिवपरिसरः, पुरी, ओडिशा।

# श्रीमद्भगवद्गीतोपनिषत्सु काव्यतत्त्वम्

**डॉ. सुशान्तकुमारराज**

## प्रस्तावना

सर्वोपनिषदो गावो, दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।१ इति।

एतद्वचनानुसारेण साक्षाद्भगवतः श्रीकृष्णस्य मुखपद्मविनिःसृता वाणी श्रीमद्भगवद्गीता सर्वोपनिषदां सारभूताऽस्तीति सर्वैरङ्गीक्रियते। महाभारतयुद्धक्षेत्रे विविधानिष्टसम्भावनया चिन्तासङ्कुलविषादग्रस्तं मध्यमपाण्डवमर्जुनं प्रति इयमेव समुचितोपदेशावलीसम्बलितकर्तव्याकर्तव्यज्ञानप्रदायिनीति ज्ञायते। न केवलम् अर्जुनस्य कृते अपि तु समग्रमानवसमाजस्य कृते इयं सकलज्ञानदायिनी शक्तिरित्यत्र नास्ति काऽपि विप्रतिपत्तिः। अतः इयं श्रीमद्भगवद्गीतोपनिषदिति नाम्नाऽपि विद्वज्जनेषु सुख्याताऽस्ति।

वर्तमानकाले उपनिषद्वाङ्मयस्य उपादेयता इति प्रमुखविषयाधारेण उत्तराखण्ड–संस्कृत–अकादमी द्वारा आयोज्यमाणे अखिलभारतीयशोधसम्मेलनेऽहं श्रीमद्भगवद्गीतोपनिषत्सु काव्यतत्त्वम् इति शीर्षकोपेतं शोधपत्रं प्रस्तोतुम् इच्छामि।

किं नाम उपनिषद् इति जिज्ञासायाम् उच्यते– उप समीपे निः निःशेषेण सर्वतोभावेन वा सद् विद्यमाने इति धातोः क्विप् प्रत्यये उपनिषद् इति शब्दस्य निष्पत्तिर्भवति, यस्यार्थो भवति परमात्मसम्बन्ध्याप्तज्ञानम्। उपनिषदां मूलमुद्देश्यं भवति वेदे विद्यमानानां गूढतात्पर्यपूर्णानामर्थानां समुपस्थापनेन सह सकलसज्जनानां कृते कर्तव्याकर्तव्यज्ञानज्ञापनम्। अस्मात् कारणात् उपनिषत्तु वेदादिशास्त्राणां सम्पूर्णनिकटवर्तिनीति अङ्गीक्रियते। वेदास्तु सर्वेषां शास्त्राणां मूलभूताः सन्ति। अतः वेदानां सारभूतायाः उपनिषदः अपि शास्त्रमूलत्वं वर्तते।

संस्कृतसाहित्यसंसदि यद्यपि उपनिषदः ईश–केन–कठ–प्रश्नादिरूपेण दशसंख्यकाः सुख्याताः सन्ति तथापि तस्याः शताधिकसंख्या अङ्गीकृताऽस्ति। मुक्तकोपनिषदि तु उपनिषदः आहत्य अष्टाधिकैकशतसंख्या निर्धारिताः सन्ति। क्रमशः तस्या संख्या इतोऽपि वर्धिता इति ज्ञायते। अस्यामवस्थायां भगवतः श्रीकृष्णस्य मुखपद्मविनिर्गता प्रवृत्तिनिवृत्यात्मिका वाणी श्रीमद्भगवद्गीतोपनिषद्रूपेण सुख्याता।

द्वापरयुगे धर्माधर्मयोः स्थितिं निर्धारयितुं कौरवपाण्डवयोर्मध्ये कुरुक्षेत्रे महाभारतयुद्धं जातम्। तस्मिन्नेव युद्धे अधर्मकर्मकलुषितानां कौरवाणां पराजयस्तथा धर्मभावनासम्पन्नानां पाण्डवानां विजयश्चाभवत्। अयमेवास्माकं भारतीयसनातनधर्मपरम्परायां विश्वासो वर्तते यद् युगे युगे सर्वत्र सर्वदैवान्तिमे पर्यायेऽधर्मसमीपे धर्मस्यैव विजयः सम्पद्यते। एतादृशधर्माधर्मप्रवृत्तिनिवृत्तियोगयोपदेशप्रदानस्याकारभूताऽस्ति साक्षाद्भगवतः श्रीकृष्णस्य मुखपद्मविनिःसृता वाणी श्रीमद्भगवद्गीता इत्यत्र नास्ति काऽपि विप्रतिपत्तिः। श्रीमद्भगवगीतोपनिषदपि सर्वशास्त्रमूलमिति ज्ञायते। यथोक्तम्–

एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा।।२ इति।।

महाभारतस्य भीष्मपर्वणि युद्धक्षेत्रे वैराग्यमापन्नस्य अर्जुनस्य कृते यत् सारतत्त्वं भगवता श्रीकृष्णेन श्रावितं, तत् सर्वं श्रीमद्भगवद्गीता इति रूपेणाथवा श्रीमद्भगवद्गीतोपनिषद्रूपेण अस्माकं सर्वेषां सम्मुखे राजते। श्रीमद्भगवद्गीतोपनिषद् यद्यपि दार्शनिकतत्त्वसम्बलितज्ञानविज्ञानस्य मूलमस्ति, तथापि काव्यशास्त्रीयतत्त्वानामपि निवेशनेनेयम् एककालावच्छिन्नतया प्रभुसम्मितं सुहृत्सम्मितं कान्तासम्मितं चोपदेशत्रयमेव सर्वेषां काव्यरसिकानां कृते प्रदाय संस्कृतवाङ्मये नितरां स्वप्राधान्यं प्रतिपादयतीत्यत्र नास्ति काऽपि विप्रतिपत्तिः।

**काव्यशास्त्रीयतत्त्वानि–**

सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्३ इति ध्वन्यालोके अनन्दवर्धनस्योक्त्यनुसारेण सकलसहृदयानां मनसि परमानन्दप्रदानात्मिका कविभावना काव्यरूपेण व्यवह्रियते। अत: कवे: अलौकिकं कर्म काव्यमित्युच्यते। तच्च काव्यं युगे युगे समाजस्य संस्कारसाधने प्रयत्नशीलं भवति। वेदोपवेदोपनिषत्सु जायमाना चतुर्वर्गफलप्राप्ति: काव्यात् सुखेन अल्पधियामपि जायते४ अत: आधुनिकसमाजे काव्यानां परमोपादेयता वर्तते। काव्यसंसारे सकलकलाभि: सह सर्वशास्त्रीयतत्त्वानि अपि निवेशितानि सन्ति। काव्यस्योत्कर्षवर्धनाय तत्र रस–ध्वनि–वक्रोक्ति–रीति–गुणालङ्कारप्रभृतीनि विविधानि काव्यतत्त्वानि निवेश्यन्ते कविभि:। एतेषां विविधप्रकारकाव्यानां समाहारेण साहित्यं समुत्पद्यते। तस्य साहित्यस्य स्वरूपमपि निर्धारितमस्ति यथा– सहितानां काव्यानां तदङ्गानां च समष्टिरेव साहित्यमिति रसनिष्पत्तितत्त्वालोके प्रतिपादतमस्ति अस्मद्गुरुपादै: श्रीमददाचार्यभागवतप्रसादत्रिपाठिशर्मभि:।

एतच्च साहित्यं लक्ष्यसाहित्यं लक्षणसाहित्यं चेति द्विधा विभज्यते। सर्वाण्येव काव्यानि लक्ष्यसाहित्यमिति आनन्दवर्धनमम्मटप्रमुखैरालङ्कारिकाचार्यैरङ्गीक्रियते। तत्र रामायणमहाभारतप्रभृतीन्यपि प्रामाणिकलक्ष्यसाहित्यरूपेण स्वीकृतानि सन्ति। यथोक्तं श्रीमदानन्दवर्धनाचार्येण ध्वन्यालोके ग्रन्थे– तस्य हि ध्वने: स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिरपि चिरन्तनकाव्यलक्षण–विधायिनां बुद्धिभिरनुन्मीलितपूर्वम्, अथ च रामायणमहाभारतप्रभृतीनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयता सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते५ इति। अत: रामायणवत् महाभारतमपि आर्षकाव्यत्वेनाङ्गीक्रियते। तस्माद् महाभारतस्य अंशभूताया: श्रीमद्भगवद्गीताया: अपि विशिष्टकाव्यत्वेन ग्रहणं तु युक्तिसङ्गतमेव। काव्येषु विद्यमानानि विविधानि काव्यतत्त्वानि एव साहित्यशास्त्रीयविचारधाराधायकानीति ज्ञायते। प्रसङ्गेऽस्मिन् श्रीमद्भगवद्गीतायां विद्यमानानां काव्यशास्त्रीयतत्त्वानामन्वेषणं विधीयते।

**श्रीमद्भगवद्गीतायां काव्यप्रयोजनान्वेषणम्–**

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति नियमाधारेण काव्यशास्त्रेषु आदौ काव्यस्य प्रयोजनविचारो विधीयते। काव्यस्य प्रयोजननिरूपणप्रसङ्गे आचार्यभामहो वक्ति –

> धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
> करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।।६ इति।

तन्मतानुसारेणाचार्यविश्वनाथकविराजोऽपि काव्यस्य प्रयोजनं निरूपयति यथा–

> चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि।
> काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।७ इति।

अत: तन्मतानुसारेण काव्यादेव सुखेनैवाल्पधियामपि चतुर्वर्गफलप्राप्तिर्भवति। कथमित्याकाङ्क्षायामाह–

काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना, एक: शब्द: सुप्रयुक्त: सम्यग्ज्ञात: स्वर्गे लोके च कामधुग्भवति इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्जन्यधर्मफलाननुसन्धानात् । मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्चे८ति।

एतादृशविचारधाराधारेणावगम्यते यत् श्रीमद्भगवद्गीता भवति शुद्धबुद्धमुक्तस्वभावमयनित्यानन्दस्वरूपस्य साक्षाद्भगवत: श्रीकृष्णस्य मुखपद्मादेव विनि:सृता वाणी। श्रीमद्भगवद्गीताया: प्रथमाध्याये प्रथमे श्लोके धर्मक्षेत्रे इति प्रथमपद्यमेव धर्मत: समारब्धमस्ति, यत्तु धर्माख्यं पुरुषार्थं प्राथम्येन सूचयति। न केवलमेतदेव अपितु समग्रमेव श्रीमद्भगवद्गीताशास्त्रं धर्माच्छादितमस्तीत्यप्यवगम्यते। श्रीमद्भगवद्गीता प्रथमाध्यायस्य धर्मक्षेत्रे इति प्रथमपदत: आरभ्य अष्टादशाध्यायस्य अष्टसप्ततितमपद्यस्यान्तिमपदं मतिर्मम इति यावत् सुविस्तृताऽस्ति। अत: प्रथमपदस्य धर् इत्यनेन सह अन्तिमपदस्यान्तिमवर्णस्य म इत्यस्य समन्वयं कुर्मश्चेत् धर्म इति शब्दस्य निष्पत्तिर्भवति। अतोऽनेन ज्ञायते यद् आदित: अन्तं यावद् समग्रा एव श्रीमद्भगवद्गीता धर्मभावनासम्बलिता अस्ति इति। तस्मात् केवलं श्रीमद्भगवद्गीतोक्तधर्मपालनेनैव सर्वशास्त्रीयसिद्धि: प्राप्तुं शक्यते। इयं तु सर्वदा सर्वान् स्वधर्मसाधनाय प्रवर्तयति। यथोक्तम्–

> श्रेयान्स्वधर्मो विगुण: परधर्मात्स्वनुष्ठितात् ।
> स्वधर्मे निधनं श्रेय: परधर्मो भयावह: ।।९ इति।

पुनश्चात्र धर्मनिष्ठसत्कर्मसम्पादनाय सम्यगुपदेशो वर्तते । यथोक्तं सप्तदशाध्याये–

> यज्ञे तपसि दाने च स्थिति: सदिति चोच्यते ।
> कर्म चैव तदर्थीयं सदित्येवाभिधीयते।।१० इति।

सर्वोपरि ज्ञायते यत् कुरुक्षेत्रे वस्तुत: देवा मुनयश्च यज्ञानुष्ठानं सम्पादयन्ति स्म। राजा कुरुरपि तत्रैव स्वतपस्याम् आचरितवान् । यज्ञादिधर्ममयकार्यसम्पादनादिदं धर्मक्षेत्रमिति तथा कुरुराजस्य तपस्याभूमित्वादिदं कुरुक्षेत्रं चेति पौराणिका वदन्ति।

महाभारतयुद्धस्य प्रमुखकारणमस्ति साम्राज्यरूपधनस्य प्राप्तिरेव । वस्तुत: यद्यपि राज्योपभोगे कौरवपाण्डवयो: तुल्याधिकार: आसीत्तथापि अधर्मपरायणदुर्योधनाधिष्ठिता: कौरवा: तु पाण्डवानां कृते सूच्यग्रपरिमितामपि भूमिं प्रदातुं नैवाङ्गीकृतवन्तोऽत: तद्धनप्राप्तये धर्मसमरोऽयं समुद्भूत: इति कृत्वाऽत्र श्रीमद्भगवद्गीतायां अर्थाख्य: द्वितीयपुरुषार्थोऽपि सम्प्राप्यते। किञ्च श्रीमद्भगवद्गीताया: पारायणेन, प्रवचनादिगीतायज्ञेन च आधुनिके कालेऽपि अर्थप्राप्तिर्जायते इति प्रत्यक्षसिद्धम्।

अर्थद्वारेण कामप्राप्तिरिति न्यायेन श्रीमद्भगवद्गीताया: अध्ययन–मनन–प्रवचनादिभि: समुपार्जितेन धनेन कामप्राप्तिरपि सुगमा सम्पद्यते। किञ्च गीताया: अध्ययनादिना मानव: सत्कर्मकरणात् न्यायमार्गोपरि चलन् परब्रह्मण: स्मरणं कुर्वन् सात्त्विकाध्यात्मिकजीवनं यापयन् परमपदलाभरूपकमलौकिकं कामं लभते इत्यत्र नास्ति विप्रतिपत्ति:। अपि चात्र गीतायां काम एष क्रोध एष,११ कामरूपेण कौन्तेय दुष्पूरेणानलेन च,१२ कामरूपं दुरासदम्१३ इत्यादिभि: कर्माकर्मव्यापारनिर्देशद्वारा कामाभिधेयस्य तृतीयपुरुषार्थस्यापि निदर्शनं प्राप्यते।

मोक्षरूपस्य परमपुरुषार्थस्य सम्प्राप्तये संस्कृतवाङ्मये प्रस्थानत्रयी स्वीक्रियते, यथा– उपनिषद्, ब्रह्मसूत्रं, श्रीमद्भगवद्गीता चेति ग्रन्थरत्नत्रयं सुख्यातम् अस्ति। तत्र श्रीमद्भगवद्गीताया एव प्राधान्यं सर्वैरेवाङ्गीक्रियते। अत: चतुर्वर्गफलप्राप्तये संस्कृतवाङ्मये विद्यमानेषु काव्यशास्त्रादिषु अस्या: स्थानं वर्तते सर्वोपरि।

काव्यप्रयोजननिरूपणप्रसङ्गे वाग्देवतावतारेणाचार्यमम्मटेन अङ्गीकृतानि षट् प्रयोजनान्यपि१४ श्रीमद्भगवद्गीतायां प्राप्यन्ते। अस्या: श्रवणाध्ययनादिभि: य: कोऽपि धार्मिको जन: यथा यशस्वी भवति तथैव तस्य भक्तजनस्य व्यवहारोऽपि सुव्यवस्थितो जायते। अमङ्गलविनाशाय च श्रीमद्भगवद्गीताया: सर्वथा प्रयोजनं साधुभिरङ्गीक्रियते। तस्या: अध्ययनश्रवणादिभि:

भक्तिरसामृतसेवनेन च भक्तः सत्वरमेवालौकिकं रसानन्दं प्राप्नोतीति सहृदयाः एव प्रमाणम् । सर्वोपरि प्रभुसम्मित–सुहृद्सम्मित–कान्तासम्मितरूपेण त्रिविधोऽप्युपदेशः अत्र एककालावच्छिन्नतया सम्प्राप्यते इति कृत्वा अस्याः वैशिष्ट्यं सर्वमान्यमस्ति। यथा–

१. कृष्णस्तु भगवान्स्वयम् इति सिद्धान्तानुसारेण जगद्गुरुः श्रीकृष्ण एव अर्जुनमाध्यमेन सर्वेषां मानवानां कृते गीतोपदेशं ददातीति सर्वैरनुमोद्यते। अतोऽत्र प्रभुसम्मितोपदेशः प्राप्यते इति ज्ञायते।

२. भगवान् श्रीकृष्णस्तु मध्यमपाण्डवस्यार्जुनस्य सखा इति सर्वविदितम्। अतोऽत्र भगवता प्रदतोपदेशः अर्जुनस्य कृते सुहृत्सम्मितोपदेशरूपेणाप्यङ्गीक्रियते। यथोक्तमर्जुनेन–

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि।।१५ इत्यादि।।

३. भगवतः मुखारविन्दनिःसृता वाणी व्यासदेवेन तु छन्दोबद्धरचनया सहृदयानां हृदयारविन्दाह्लाददायकतया समुपस्थापिताऽस्ति। सा एव ललितोचितशब्दसन्निवेशेन छन्दोबद्धश्लोकमयीरचनया च काव्यमयी वाणीरूपेणैवाङ्गीकृताऽस्ति। एतादृशकाव्यमयीवाणी एवात्र कान्तासम्मितत्योपदेशद्वारेण श्रीकृष्णार्जुनादिवत्प्रवर्तितव्यं न कदाऽपि दुर्योधनादिवदिति कृत्याकृत्यप्रवृत्तिनिवृत्तियोग्यज्ञानमुत्पादयति प्रसारयति चेतीत्यत्र नास्ति संन्देहस्यावकाशः।

**श्रीमद्भगवद्गीतायां काव्यस्वरूपसमन्वयः–**

विविधवाच्यवाचकरचनाप्रपञ्चसन्निवेशचारुणः काव्यस्य स्वरूपनिरूपणपरम्परायां भरतमुनेः आरभ्य अद्य यावद् यानि कानिचन लक्षणानि आलङ्कारिकाचार्यैः विनिर्मितानि सहृदयैश्चाङ्गीकृतानि सन्ति, तनि सर्वाण्यपि अत्र श्रीमद्भगवद्गीतायां समन्वितानीति ज्ञायते। तेषु मम्मटाचार्यस्य१६ काव्यलक्षणदृष्ट्या श्रीमद्भगवद्गीतायां तु सर्वथा दोषरहितयोः गुणालङ्कारसमन्वितयोः गूढतात्पर्यपूर्णशब्दार्थयोः सद्भावो वर्तते इति। काव्यशास्त्रे कविः प्रजापतित्वेन१७ क्रान्तदर्शिरूपेण१८ च वर्ण्यते। श्रीमद्भगवद्गीतायाः प्रवक्ता प्रजापतेरप्युत्पादकः साक्षाद्भगवान् विष्णुरेवास्ति१९ यः सर्वज्ञानभाण्डागारत्वेनापि प्रकाशितोऽस्ति। साहित्यदर्पणकारस्य वाक्यं रसात्मकं काव्यम्२० इति काव्यस्वरूपानुसारेणाप्यत्र यानि यानि वाक्यानि सन्ति, तानि सर्वाण्यपि तत्तत्प्रसङ्गानुरोधेन शृङ्गारवीरशान्तादीनां रसानां व्यञ्जकानि भवन्तीति वक्ष्यते। पण्डितराजजगन्नाथस्य काव्यलक्षणं भवति रमणीयार्थप्रतिपादकः शब्दः काव्य२१मिति। एतन्मतानुसारेणापि श्रीमद्भगवद्गीता प्रमुखकाव्यत्वेन अङ्गीकर्तुं शक्यते। अस्यां श्रीमद्भगवद्गीतायां भक्तिभावामृतात्मकलोकोत्तरानन्दजनकज्ञानगोचरता यथा वर्तते, न तथा अन्यत्र काव्येषु समुपलभ्यते। एतद्दृष्ट्या भक्तिभावस्तु रूपगोस्वामिप्रमुखैरालङ्कारिकैः भक्तिः रसरूपेणापि स्वीकृता२२। तस्मात् कृष्णद्वैपायनेन विरचितेयं लोकोत्तराह्लादकारिणी श्रीमद्भगवद्गीता न केवलं काव्यसामान्यरूपेण अङ्गीकृता अपितु अष्टादशस्वर्गसम्बलितमहाकाव्यरूपेण अथच आर्षमहाकाव्यरूपेणापि परिचाययितुं शक्यते।

**श्रीमद्भगवद्गीतायां भावपक्षान्वेषणम्–**

काव्यशास्त्रानुसारेण काव्येषु भावपक्षस्य महत्त्वं सर्वोपरि वर्तते। ध्वनिः रसः भावाश्च भावपक्षान्तर्गताः भवन्ति। ध्वनिवाद्याचार्याणां मतानुसारेण काव्यस्यात्मा ध्वनिः२३। अतः व्यङ्ग्यप्रधानभूतस्य ध्वनेः विद्यमानता नितान्तमेव आवश्यकी वर्तते। तत्र वस्त्वलङ्काररसेषु त्रिविधध्वनिषु रसध्वनेरेव प्राधान्यं वर्तते इति विचारेणोच्यते आचार्यानन्दवर्धनेन–

काव्यस्यात्मा स एवार्थस्तथा चादि कवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।२४ इति।

अतः काव्येषु रसध्वनेरेव प्राधान्यमनुभूयते। महाकाव्ये तु शृङ्गारवीरशान्तेषु एकस्य अङ्गित्वेनैवाङ्गीकर्तव्यमिति सिद्धान्तो वर्तते। तदनुसारेण अन्येषां सर्वेषामपि रसानां तु तदङ्गत्वसाधनमिति च व्यवस्था वर्तते साहित्यशास्त्रे२५। तन्नियमानुरूपतया श्रीमद्भगवद्गीतायां विविधरसभावादिभिस्सह शृङ्गारवीरशान्तानां प्रावल्यमनुभूयते। प्रसङ्गेऽस्मिन् प्रश्नो जायते यदत्र विविधभक्तिभावसम्बलितायां श्रीमद्भगवद्गीतायां शृङ्गाररसस्य स्थानं कुतः आयातम् ? उच्यते–

वस्तुतः शृङ्गरो विष्णुदैवतः२६ इति नाट्यशास्त्रकारस्य भरतमुनेः वचनानुसारेण शृङ्गाररसस्य देवो भगवान् विष्णुः एवास्ति। तस्य विष्णुदेवस्य रूपान्तरमयं भगवान् श्रीकृष्णः। तस्य भगवतः मुखनिःसृता वाणी एवेयं श्रीमद्भगवद्गीता संस्कृतसाहित्यस्य प्राणभूताऽस्ति। पुनश्च तस्यैव नाट्यशास्त्रस्य श्यामो भवति शृङ्गारः२७ इति वचनानुसारेण तथैव श्रीविष्णुदेवस्य श्यामलवर्णत्वात्तदधिगतः शृङ्गाररसोऽपि श्यामलवर्णयुतः इति कल्प्यते। अतः भगवद्गीतायां शृङ्गारस्य स्थितिरपि कल्पयितुं शक्यते।

किञ्च श्रीमद्भगवद्गीतायाः प्रथमाध्याये अर्जुनः शोकसन्तप्तमानसः सन् कुरुकुलक्षये कुलस्त्रीणां भाविनष्टचरित्रत्वं सम्भावयति। ततः वर्णसङ्करोत्पत्तिं च सम्भावयन् वक्ति–

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः।।२८ इत्यादि।

एतस्मादप्यत्र अनुचितरतिसम्भावनात् शृङ्गाररसाभासोऽपि समनुभूयते सकलसहृदयैरित्यत्र नास्ति काऽपि विप्रतिपत्तिः। सर्वेऽमी रसनाद्रसाः२९ इति आलङ्कारिकोक्त्यनुसारेण रसाभासोऽपि रसरूपेण गण्यते।

करुणरसोऽप्यत्र वर्तते, यथा शोकसंविग्नमानसः३० अश्रुपूर्णाकुलेक्षणम् ३१ इत्यादिषु अर्जुनस्य शोकाकुलत्वं व्यज्यते। तेन हि सुस्पष्टमेवोक्तम्–

गुरूनहत्वा हि महानुभावान्
श्रेयो भक्तुं भैक्ष्यमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ।।३२ इति।

अतोऽत्र करुणरसो वर्तते इत्यत्र नास्ति काऽपि शङ्का।

श्रीमद्भगवद्गीतायां तु प्रसङ्गानुसारेण कदाचिद् भयानकरसोऽपि प्राज्ञैरनुभूयते। यथोक्तम् अर्जुनेन–

सीदन्ति मम गात्राणि मुखं च परिशुष्यति।।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते।
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः।३३ इत्यादि।

शोकसन्तप्तम् अर्जुनं महाभारताख्यधर्मयुद्धकर्मणि प्रवर्तयितुम् एव श्रीकृष्णेन श्रीमद्भगवद्गीतावाणी प्रवर्तिता इति कृत्वा अत्र उत्साहस्यानुभवो भवति। अतोऽत्र वीररसो वर्तते इति सर्वैरङ्गीक्रियते। यथोक्तं भगवता–

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ।।
क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते।

क्षुद्रं हृद-नदौर्बल्नं त्नक्त्वोत्तिष्ठ परन्तप।।३४ इत्नादि।

तथा च हतो वा प्राप्स्नसि स्वर्गं जित्वा वा भोक्ष्नसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेन नुद्धान कृतनिश्चन:।।३५ इति।

पुनश्च सुखदु:खे समे कृत्वा लाभालाभौ जनाजनौ।
ततो नुद्धान नुज्नस्व नैव पापमवाप्स्नसि।।३६ इति।

विश्वरूपदर्शनादनन्तरमपि भगवता श्रीकृष्णेन पार्थान उपदेशरूपेणैवोक्तम्–

तस्मात्त्वमुत्तिष्ठ नशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्नं समृद्धम्।३७ इत्नादि।

एवमत्र वीररसस्न प्रावल्नं वरीवर्तते। समग्रगीता तु युद्धवीरस्यार्जुनस्य कृते धर्मयुद्धोत्साहवर्द्धनाय एव विरचिता इति कृत्वा अत्र वीररसस्यानुभव: सर्वजनानुमोदनसिद्धोऽस्ति।

भगवत: विश्वरूपदर्शनावसरे अद्भुतरसस्यापि चरमनिदर्शनं प्राप्यते। नथा–

अनेकबाहूदरवक्त्रनेत्रं पश्नामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्नं न पुनस्तवादिं पश्नामि विश्वेश्वर विश्वरूप।।३८ इत्नादि।

सर्वोपरि अस्यां भगवद्गीतानां परमपुरुषार्थमूलक: शान्तरस अङ्गिरसरूपेणैवाङ्गीक्रियते। देव–गुरु–सखादिविषयको रतिभावोऽप्यत्र सकलसहृदयैरनुभूयते। अन्नेषां व्नभिचारिभावानां सात्त्विकभावानां च प्रनोगोऽप्नत्रावलोक्नते। पुनश्चात्र गुणालङ्कारादीनां काव्यशास्त्रीयतत्त्वानामपि समावेशो वर्तते इति समनुभूनते।

**श्रीमद्भगवद्गीतायां काव्यात्मतत्त्वान्वेषणम्–**

काव्ने विद्यमानेषु तत्त्वेषु प्रमुखतत्त्वमेव काव्नात्मपदार्थत्वेनावगम्नते। तस्नैवात्मन: स्वरूपमपि विविधेषु शास्त्रेषु नथा आकलितमस्ति तथैव काव्नशास्त्रेऽपि विचारितमस्ति। श्रीमद्भगवद्गीतानां तु तस्न स्वरूपं परमरमणीनतना विहितमस्ति। नथा–

न जानते म्रिनते वा कदाचित् नानं भूत्वा भविता वा न भून:।
अजो नित्न: शाश्वतोऽनं पुराणो न हन्नते हन्नमाने शरीरे।।३९ इत्नादि।।

अत्र तु श्रीमद्भगवद्गीतानां लक्षणशास्त्रत्वमनुभूनते। तदनुसारेण काव्नशास्त्रेऽपि काव्नात्मविचार: प्रवर्तितोऽस्ति इति वक्तुं शक्नते। काव्नात्मतत्त्वविचारप्रसङ्गे नद्यपि साहित्नशास्त्रे षट्सम्प्रदाना: सन्ति। तथापि आधुनिकै: ध्वेनेरेव काव्नात्मत्त्वम् अङ्गीकृतमिति ज्ञानते। तत्र रसध्वनेरेव प्राधान्नं वर्तते इति पूर्वं प्रतिपादितम् । परन्तु महाकाव्नलक्षणानुसारेण काव्ने एक एव रस: अङ्गिरसरूपेण स्वीक्रियते। अन्ने तु अङ्गत्वं भजन्ते इति निर्णनोऽस्ति । नन्निर्णनाधारेण श्रीमद्भगवद्गीतानां क: अङ्गी रस: इति जिज्ञासा समुत्पद्यते। उच्नते– नद्यप्नत्र वीररसस्न प्रावल्नं तथा भक्तिभावस्न प्राचुर्नं समनुभूनते, तथापि अस्नां मोक्ष एव परमपुरुषार्थत्वात् शान्तरसस्न प्राधान्नं स्वीक्रिनते। शान्तरस एवात्र अङ्गिरस इति निर्णेतुं शक्नते। ध्वन्नालोककारस्नाचार्नानन्दवर्धनस्न मतानुसारेणापि महाभारते शान्तरस: अङ्गिरसत्वेन३८ सिद्धान्तितोऽतोऽत्रापि स एव सिद्धान्त: बलवत्तरोऽस्तीति सिद्धान्तितम्।

एवमनना पर्नालोचनना अस्माभिरनुभूनते नत् श्रीमद्भगवद्गीतासु उपनिषत्सु सर्वाण्यपि काव्यतत्त्वानि तत्तत्प्रसङ्गानुरोधेन निवेशितानि सन्ति। तेषां सर्वेषामपि काव्यतत्त्वानां समावेशबलेन इनं श्रीमद्भगवद्गीता परमरमणीनमहाकाव्नरूपेणापि सहृदयेषु परिचिताऽस्ति। इति दिक्।

**सन्दर्भा**


१. गीताध्नानम्।।
२. गीतामाहात्म्नम् ।।
३. ध्वन्ना–१. पृ. २३।।
४. सा. द. १–२ ।
५. ध्वन्ना–१. पृ. ३७।।
६. का.अ. १.।।
७. साहित्नदर्पण:– १.२।।
८. सा.द. अ–१, पृ–४ ।।
९. गीता– ३.३५।।
१०. गीता– १७.२७।।
११. गीता– ३.३७।।
१२. गीता–३.३९।।
१३. गीता– ३.४३।।
१४. काव्नप्रकाश:– १.२।।
१५. गीता–११.४१।।
१६. तददोषौ शब्दार्थौ सगुणावनलंकृती पुन: क्वापि।। काव्नप्रकाश:–उ. १ सू. १।।
१७. अपारे काव्नसंसारे कविरेव प्रजापति:।
नथोऽस्मै रोचते विश्वं तथेदं परिवर्त्नते।। ध्वन्ना–३
१८. कवन: क्रान्तदर्शिन:।।
१९. गीता सुगीता कर्तव्ना किमन्नै शास्त्रविस्तरै:।
ना स्वनं पद्मनाभस्न मुखपद्माद्विनिसृता।। गीतामाहात्म्नम् ।।
२०. साहित्नदर्पण:–१.
२१. रसगङ्गाधर:– १. १ ।।
२२. द्र. भक्तिरसामृतसिन्धु:।।
२३. ध्वन्ना. १. १ ।।
२४. ध्वन्ना. १. ५ ।।
२५. साहित्नदर्पण:– ६।।
२६. नाट्यशास्त्रम्– अध्नान–६।।
२७. नाट्यशास्त्रम्– अध्नान–६।।
२८. गीता–१.४० ।।
२९. सर्वे इत्युक्ते– रस:,भाव:, रसाभास:, भावाभास:, भावोदय:, भावसन्धि:, भावशबलता, भावशान्तिश्चेति रसरूपेण अङ्गीकुर्वन्ति विश्वनाथ-मम्मटानन्दवर्धनप्रमुखा:।
३०. गीता– १.४६।।
३१. गीता–२.१।।
३२. ३२गीता– २.५।।
३३. गीता– १.२८–३०।।
३४. गीता– २.२–३।।
३५. गीता–२.३७।।
३६. गीता– २.३८ ।।
३७. गीता– ११.३३।।
३८. गीता–११.१६।।
३९. गीता–२.२०।।
४०. ४०. ध्वन्यालोक:– चतुर्थोद्यत:, पृ–४६७।।

**सहा-नकग्रन्थानुक्रमणिका**

**ग्रन्थाः ग्रन्थकाराः प्रकाशकाः**

| | | |
|---|---|---|
| १. ईशादि नौ उपनिषद् | हरिकृष्णदास गयन्दका | गीताप्रेस, गोरखर–२७३००५। |
| २. काव्यप्रकाशः | मम्मटाचार्यः | सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, सं. २००२। |
| ३. काव्यालङ्कारः | आचार्यभामहः | परिमलप्रकाशन, शक्तिनगर, नई दिल्ली–७ । |
| ४. ध्वन्यालोकः | आनन्दवर्धनः | लोचनटीका, चौखम्बा विद्याभवन, वाराणसी, पुनः संस्करण–२०११। |
| ५. श्रीमद्भगवद्गीता | व्यासदेवः | गीताप्रेस, गोरखर–२७३००५। |
| ६. साहित्यदर्पणः | विश्वनाथकविराजः | लक्ष्मीटीका, चौखम्बा संस्कृत संस्थान, वाराणसी–२२१००१। |